|| শ্ৰী ||
অথ শ্ৰী ত্ৰিৱিক্ৰমপংডিতাচাৰ্য়সুত শ্ৰী নাৰায়ণপংডিতাচাৰ্য়ৱিৰচিতঃ
|| শ্ৰী মধ্ৱৱিজয়ঃ ||

১৬. ষোডশঃ সৰ্গঃ

সাধুভ্যো মধুমথনাংঘ্ৰিভক্তিভাগ্ভ্যঃ
শ্ৰৌতেভ্যো ৱিততমতেৰ্মহানুভাৱম |
ৱেদাংতং স্ৱয়মিৱ বংধমোক্ষমূলং
ৱ্যাচষ্ট স্ফুটমথ কোঽপি কোৱিদোঽত্ৰ || ১৬.১ ||

গোমত্যাস্তটনিকটেঽচ্ছকীৰ্তিচংদ্ৰং ৱিশ্ৱজ্ঞং ক্ষিতিপতিৰংত্যৱৰ্ণজন্মা |
ৱিদ্ৱেষ্টা শ্ৰুতিগুণসাধকং শ্ৰুতীনাং ৱাচালো ৱচনমুৱাচ ৱাগ্মিৱৰ্য়ম || ১৬.২ ||

উন্মত্তপ্ৰলপিতৱন্ন তদ্ধি মানং য়দ ৱাক্যং ৱ্যভিচৰতি ক্ৱচিত ফলেঽত্ৰ |
দৃষ্টাংতো ভৱতি তদপ্ৰমাণতায়াং সৰ্ৱেষাং শ্ৰুতিৱচসাং চ সৰ্ৱথেতি || ১৬.৩ ||

ৱেদোক্তং ফলমলমাপ্যতেঽধিকাৰাদ ইত্যুক্তোঽতনুমনসাঽভ্যধত্ত ধূৰ্তঃ |
য়োগ্যৎেৱ সতি ন হি দৃশ্যতেঽধিকাৰী নাতঃ স্যাত স খৱৱিষাণৱত সদেতি ||
১৬.৪ ||

আক্ষেপং তমসহমান উচ্চমানঃ সদ্যোঽসৌ নিজকৰপল্লৱদ্ৱয়েন |
আদায় ৱ্যতনুত বীজমোষধীনাং সূক্তেনাংকুৰদলপুশ্পবীজসৃষ্টিম || ১৬.৫ ||

ৱ্যাখ্যাতা নিশি স কদাচন প্রদীপে
সংশাংতে পুনৰপি ৱাচয়াংবভূৱ |
শিষ্যান স্ৱান পুৰুকৰুণাংবুধির্নিজাংঘ্রেঃ
অংগুষ্ঠস্ফুটনখৰাংতৰোচিষৈৰ || ১৬.৬ ||

তীর্থার্থং পৃথুতৰৱপ্রপাতিৱাৰাং ধাৰাণাং ৰয়সহনক্ষমাং মহেক্ষঃ |
আনীতাং দশশতপুংভিৰত্যশক্ত্যা প্রেক্ষ্যোচে ৱিপুলশিলাং ক্ৱচিত স মুক্তাম
|| ১৬.৭ ||

লোকানামুপকৃতয়ে কুতঃ শিলেয়ং নিন্যে নো ইতি জনতা জগাদ তত্র |
নেতাৰো য়তিৱৰ মানৱা ন হীমাং ভীমশ্চেদিহ য়ততে নয়েন্ন ৱেতি || ১৬.৮ ||

নিন্যে তাং গিৰিমিৱ ৱানৰীকৃতাত্মা লীলাৱৎকৰকমলেন সোঽমলেন |
তত্রাপি ন্যধিত তয়াঽস্য সূচ্যতেঽলং তত তুংগাং ননু নিকষাঽধুনাঽপি কর্ম ||
১৬.৯ ||

সংঘাতৈৰধিকঘনৈৰলংকৃতাধ্ৱা শিষ্যাণাং য়তমনসামুতেতৰেষাম |
য়ত্রামা ৱসতি তিথাৱিনেন চংদ্রঃ তত্রাসৌ সকলমতিঃ সসাৰ সিংধুম || ১৬.১০ ||

আর্দ্রাণ্গাঃ সপদি নিমজ্জনাৎসৰস্যাংকণ ৱস্য দ্ৱিজঋশভস্য ৱল্লভায়াম |
তত্রাঽয়ন খৰকিৰণোপৰাগহেতোঃ গ্রামীণা অপি সকলাঃ সবালৱৃদ্ধাঃ || ১৬.১১
||
সর্ৱজ্ঞং সপৰিজনং সমীক্ষমাণাঃ
ফুল্লাক্ষাঃ স্মিতৱদনাঃ শুভা ননংদুঃ |

দৌর্মুখ্যং দধত উতাপৰে নিনিংদুঃ
নাঽশ্চর্য়ং দ্ৱয়মপি তত স্ৱভাৱতংত্ৰম ‖ ১৬.১২ ‖

মা মৈনং ভুৱনগুৰুং ৱিনিংদতেত্থং
নির্ভৎর্স্যাভ্যপতদিৱোত্তৰংগহস্তঃ |
সংক্ষোভী ঘনঘনঘোষঘোৰৱেষঃ
সংৰংভী খলদমনায় সিংধুৰাজঃ ‖ ১৬.১৩ ‖

সম্মোদাত্ত তৰলতৰো দ্ৰুতাভিগামী গংভীৰস্ৱননুতিমান সুঘেনহাসঃ |
ৱীচ্যংগৈৰধিকতৰৈৰিহাধিৱেলং মধ্ৱায় প্ৰণতিমিৱ ৱ্যধাত সমুদ্ৰঃ ‖ ১৬.১৪ ‖

গোলীলাস্ৱতিশয়িনাৱগাধভাৱাত ন্নোল্লংঘ্যৌ ৱিৱিধগুণপ্ৰকাশৰত্নৌ |
মধ্ৱাব্ধী পৰমমতেঃ প্ৰিয়ং জনানাং লাৱণ্যং ন তু জলধেৰয়ং ৱিশেষঃ ‖ ১৬.১৫
‖

অংভোধেস্ৎৰৱিততৰোর্মিপাণিমৃষ্টে স্ৱচ্ছেঽসৌ ৱিকটতটাসনে নিষণ্ণঃ |
ৱ্যাচখ্যাৱতিচিৰমৈতৰেয়শাখা সূক্তানি প্ৰভুৰতিসুংদৰপ্ৰকাৰম ‖ ১৬.১৬ ‖

গাংভীর্য়াত স্ৱনমধৰীকৰোতি সিংধোঃ শ্ৰাৱ্যৎৰং ৱহতি তথাঽপ্যহো
স্ৱনোঽস্য |
পূর্ণেংদুপ্ৰভৱদনঃ ক এষ ধন্যো মৎৱেত্থং জনজলধিস্তমাশু পর্য়ৈত ‖ ১৬.১৭ ‖

ৱেদানাং সমুচিতভাৱৱাদদক্ষং য়ে ৱেদদ্ৱিষমিমমূচিৰে মহের্ষ্যাঃ |
ধিগ্ধিক তানিতি জনতা জগাদ তত্ৰ স্ৱাশ্চর্য়াত কিল কলিতাংজলির্নমংতী ‖

১৬.১৮ ||

সন্নামং ৱিপুলহ্রদে ৱিধায় ভক্ত্যা বিভ্রাণাশ্চৰণৰজঃ সুৰেংদ্রসেৱ্যম |
তৎস্নানাদধিকশুচৌ নদাধিৰাজে সম্নুস্তে দ্ৱিজনিকৰাঃ প্রশস্তকালে || ১৬.১৯ ||

কল্লোলৈঃ কৰিনিকৰৈৰিৱানিৱাৰ্যৈঃ উল্লোলৈৰ্জন নিকৰান নিপাতয়দ্ভিঃ |
আক্রাংতাঃ প্রবলতৰৈশ্চ লোঠ্যমানা হাস্যৎৰং প্রয়য়ুৰুদন্ৱতীহ নৈকে || ১৬.২০ ||

মজ্জংতং পৃথুলহৰীনিগূঢমূৰ্তিং সংপূৰ্ণপ্রমতিমসজ্জনো জহাস |
য়ো লোকত্রয়ৱিজয়ী গুৰুঃ প্রসিদ্ধঃ সোঽয়ং হী পততি লঘূৰ্মিলীলয়েতি || ১৬.২১ ||

নীচানামৰচ ৱচাংস্যজীগণন্নো দভ্রাণাং ক্ষুভিতকৰাণ্যদভ্রভোধঃ |
ক্রোষ্টূনাং শ্ৱকলকলপ্রদং ৱিৰাৱং পংচাস্যো ন হি গণয়েদুদাৰৱীৰ্যঃ || ১৬.২২ ||

জন্মস্থিত্যৱসিতিদায়িনং কটাক্ষং লোকানামঘটয়দংবুধৌ বৃহদ্ধীঃ |
আক্রাংতোঽধিকগুৰুণা স তেন তাৱত মুংচন সংচলনমভূত্তটাকদেশ্যঃ || ১৬.২৩ ||

ইত্যাদ্যৈৰপি চৰিতৈৰনন্যসাধ্যৈঃ ন শ্ৰেষ্ঠাং বহুমতিমাপ দুৰ্জনোঽস্মিন |
ৱিদ্ৱেষং ৱ্যধিত পুনৰ্নিৰস্তভাগ্যো তস্মিন দুৰ্মনসি তদেৱ শোভনং স্যাত || ১৬.২৪ ||

সংপ্রাপ্তং সহ সহজেন গংডৱাটং স্ৱেরাজস্সংপ্রকটন আদিশদ্ৱিশংকম |
শুশ্রূষাময়মুচিতো ৱিধাতুমীষত লোকানামিতি ৱচসা পৰীক্ষকাণাম || ১৬.২৫ ||

শ্রীকাংতেশ্ৱৰসদনেঽনয়ত কিলৈকো য়স্ত্রিংশন্নৱৱনীতকেতুয়ষ্টিম |
আহত্যা গুৰুগদয়ৈৱ নালিকেৰাদ য়ো লেভে তৰলতৰাত ফলানি কামম ||
১৬.২৬ ||

এতাদৃগ্বলৱিভৱঃ স তস্য কংঠং
তজ্জ্যেষ্ঠোঽপ্যভিত উভৌ সমং গৃহীৎৱা |
নিষ্পেষ্টুং পৰমমৱাপতুঃ প্রয়ত্নং
সংঘর্ষাত ক্রমপৰিৱৰ্ধমানতৈক্ষ্ণ্যম || ১৬.২৭ ||

আসিৱন্নাৱলসতৰৌ গুৰোৰ্নিয়োগাত ছত্রাগ্র্যনিলমহিতৌ চ তাৰুভাভ্যাম |
মুক্ৎৱাঽয়ঃকঠিনতৰৎৱচং শিৰোধিং পৰ্য়ায়স্ফুটৱচনাং নিপেততুঃ কৌ ||
১৬.২৮ ||

আশ্ৱন্তৌ শুচিহৃদিমাৱনূনমানৌ উদ্ধর্তুং সমগদদংগুলিং ধৰাস্থাম |
সংগৃহ্য প্রসভৰসাদপি প্রয়ত্তৌ সামর্থ্যং য়য়তুৰিমৌ ন কংপনেঽস্যাঃ || ১৬.২৯ ||

নিৰ্য়ত্নং ৱটুমধিৰুহ্য মংদহাসী স প্রায়াদিহ পৰিতো নৃসিংহগেহম |
ঐশ্ৱৰ্য়ৈৰিতি লঘিমাদিকৈৰুপেতো মধ্ৱোঽভূত ত্রিভুৱনচিত্রৰত্নৰাজঃ ||
১৬.৩০ ||

পংচাশন্নৱপনৱোপনীতমাত্রাং য়ো ৱাক্ষীং গৃহমধিৰোহিণীং নিনায় |

স ৱ্যাখ্যাস্ৱৰদমনায় পূৰ্ৱৰাটৌ নিৰ্দেশাদ ৱ্যধিত গুৰোৰ্গল প্ৰপেষম || ১৬.৩১ ||

স্ৱিন্নেঽস্মিন্নপি য়তমান আগ্ৰহোগ্ৰে প্ৰাচ্যাত তৎপ্ৰৱচননিস্ৱনোঽতিৰেজে |
উদ্ধৰ্তুং ৱিপুলহৃদংগুলীং চ নালং সোঽভূদিত্যজনি কুতূহলং জনানাম || ১৬.৩২ ||

পৰ্য়েক্ষি প্ৰভুৰিতৰৈঃ শিৰাগ্নিপূৰ্ৱৈঃ নোপৈক্ষি প্ৰবলতৰৈস্তথা প্ৰয়ত্নৈঃ |
নাৰৈক্ষি ক্ৱচিদপি শক্ত্যপূৰ্তিৰস্মিন উৎপ্ৰৈক্ষি স্ৱয়মপি ভীম ইত্যৱশ্যম ||
১৬.৩৩ ||

লেখিন্যাং মুহুৰপিনহ্য কৃষ্যমাণং নাপ্যেকং তনুৰুহমস্য তূদপাট |
নাসাগ্ৰে মৃদুনি কৃতৈশ্চ মুষ্টিঘাতৈঃ নাস্যেংদোৰতিবলিভিঃ প্ৰসন্নতাঽঽসি ||
১৬.৩৪ ||

পংচাস্যঃ শ্ৱভিৰিৱ হী ৱিহীনসাৰৈঃ অংভোধিৰ্নগ সৰিতাং জলৈৰিৱাল্পৈঃ |
হদ্যোতৈৰিৱ তৰণিৰ্ৱিডংবয়ন নৃন প্ৰত্যৰ্থিস্ৱসমনৱৈৰ্ৱ্যৰাহৰত সঃ || ১৬.৩৫ ||

পাৰংতীসুৰসদনং ৱিশালসংৱিত সংপ্ৰাপ্তঃ খলু সুচিৰান্নিৰেদ্যহীনম |
গ্ৰাম্যাগ্ৰ্যক্ষিতিপতিভিৰ্দিনাৰ্ধমাত্ৰাত তদ্ভূতীৰ্ৱ্যধিত সভূত বল্যনল্পাঃ || ১৬.৩৬ ||

ভীমৎৱে সহ সহজৈঃ প্ৰতিষ্ঠিতঃ প্ৰাক পংচাত্মা মুৰৰিপুৰংচিতো য়দত্ৰ |
পাংচাল্যা বলিসলিলং সমং দদত্যা সোঽস্মাৰ্ষীত তমিমমথ প্ৰপূজ্যপূজ্যঃ ||
১৬.৩৭ ||

আয়াস্যন কিল সৰিদংতৰাখ্যদেশং গ্ৰীষ্মে নিৰ্জলমিহ শুশ্ৰুৱাংস্তটাকম |
তৎকালে পৰমভিৰ্ৱৰ্ষয়ন ঘনৌঘং তৎপূৰ্ত্যৈ ৱ্যধিত কুতূহলং জনানাম ||
১৬.৩৮ ||

দুৰ্মংত্ৰৈঃ খলপটলৈঃ প্ৰচোদ্যমানো গ্ৰামেশো ৱৃশলপতিঃ প্ৰহৰ্তুমেনম |
সংপ্ৰাপ্তস্তত উত য়াংতমীক্ষমাণঃ প্ৰোদ্যংতং ৰৱিমিৱ ৱিস্মিতো ননাম |১৬.৩৯ ||

ক্ষেত্ৰাগ্ৰ্যং ত্ৰিভুৱনৱৈদ্যনাথনাথং প্ৰস্থায় প্ৰচুৰতৰাংতৰঃ প্ৰভাৱী |
শ্ৰীকৃষ্ণামৃতপৰমাৰ্ণৱাভিধানাং চক্ৰে সদ্ৱচনততিং স্ৱভক্তভূত্যৈ || ১৬.৪০ ||

স গ্ৰামং পৰমপি য়াত উচ্চভূতিং ৱিদ্ৱাংসঃ ক্ৱ কুহৰকূপদৰ্দুৰাভাঃ |
ইত্যূচে মদমতিমানিনোঽখিলজ্ঞম মন্যস্য ক্ষপয়িতুমেৱ তজ্জনস্য || ১৬.৪১ ||

সৰ্ৱ জ্ঞোঽপ্যয়মধিকং ন য়জ্ঞভংগীং সংৱিত্তে য়তিৰিতি বদ্ধনিশ্চয়োঽসৌ |
আভাংতং পৰিষদি মৎসৰাদপৃচ্ছত কৰ্মাৰ্থশ্ৰুতিগহনাৰ্থখংডভাৰম || ১৬.৪২ ||

ছংদোভ্যশ্চ্যুতৰসসংগ্ৰহপ্ৰৱীণান ষষ্ঠেঽহ্নি প্ৰতিৱিহিতান প্ৰজাধিপেন |
নাৰাশংস্যচৰমচাৰুমংত্ৰভেদান ঊচেঽসৌ তমভিদধদ ৱিসংশয়াংশঃ || ১৬.৪৩
||

পাংডিত্যং পৰমমৱেত্য তস্য তাদৃক সংঘৰ্ষত ক্ষুভিতমনা ৱিপক্ষসংঘঃ |
নাৰ্থঃ স্যাদয়মিতি ৱৰ্ণয়ন্নথ ৎৱং তং ব্ৰূহীত্যুৰুমতিনেৰিতোঽদ্ৰৱদ দ্ৰাক || ১৬.৪৪ ||

সোঽপৃচ্ছত তমথ মহাহ্ৱয়োপসৰ্গা য়ত্ৰোক্তা মনুচৰণোপসৃজ্যৰূপাঃ |

তস্যার্থং ৰচনচয়স্য তং ব্রুৱাণঃ স্থৈর্য়ার্থং সপদি স লেখয়াং বভূৱ || ১৬.৪৫ ||

সংপূর্ণং শশিনমিৱোদিতং কৃশঃ ষ্ৱা
চক্ষোভাশুভনিকৰো নিৰীক্ষ্য মধ্ৱম |
প্রত্যর্থী স্ৱয়মিতি দূৰৱোঽভিধাৱন
কিং তেন ক্ষতমমৃতাকৰস্য তস্য || ১৬.৪৬ ||

নিস্স্ৱানাং কতিপয়ভুক্তিয়ুক্তভক্তং
ভক্তানাং ৱ্যধিত চতুর্গুণং দয়ালুঃ |
ভুংক্তে স্ম ত্রিদশনৰোপভোগ্যমন্নং
সংপ্রীত্যৈ স ধনৱতাং বৃহৎপ্রবোধঃ || ১৬.৪৭ ||

ৱৃষ্ট্যাদেঃ স নিয়মনাদি চক্র এতত
চিত্রং কিং ভুৱননিয়ামকে সমীৰে |
অপ্যেৱং ভুৱনগুৰোঃ কৃতানুৱাদঃ
কৃত্যেষু প্রৱৰ ইতীহ ৱর্ণয়ামঃ || ১৬.৪৮ ||

ইত্যূচে ধৰণিসুৰেণ কেৱলং নো
মাধ্ৱীয়ং ৱিৱিধকথা কথাসু মান্যা |
সাক্ষাদপ্যমৰৱৰৈৰুদীর্য়মাণা
গংধৰ্ৱৈর্দ্যুসদসি তন্মুদে জগেঽসৌ || ১৬.৪৯ ||

তাং পদ্যপ্রণিগদিতাং তু মূর্ছয়িৎৱা
তানানামুচিততয়াঽঽত্তপংচমাদ্যাঃ |

গাংধাৰং দ্যুৰিষয়মুজ্জ্ৰলং সৃজংতো
গ্ৰামং তে প্ৰজগুৰকাকিকম্ৰকংঠাঃ ॥ ১৬.৫০ ॥

আনম্ৰৈঃ সুমুকুটমৌলিভিঃ কৰাগ্ৰৈঃ
আতাম্ৰৈঃ প্ৰতিকলিতৈঃ স্মিতৈর্মুখাব্জৈঃ ।
আশ্ৰাৰি স্থিৰতৰভক্তিভিঃ সুৰেংদ্ৰৈঃ
তদ্গীতা দশধিষণার্য্ৰৰ্য়চৰ্য়া ॥ ১৬.৫১ ॥

গীৰ্ৱাণৈৰ্ৱিজয়মহোৎসৰস্য পূজাং
কুৰ্ৱাণৈৰৰিৰলসংৰিদস্তদানীম ।
ৰিস্মেৰৈৰ্মুনিনিকৰোপদেৰযুক্তৈঃ
সুস্মেৰৈৰথ তমৰেক্ষিতুং প্ৰজগ্মে ॥ ১৬.৫২ ॥

আদৰ্শং গুণগণদৰ্শনে মুৰাৰেঃ
সচ্ছাস্ত্ৰং ৰচিতমনেন ৰৰ্ণয়ংতঃ ।
প্ৰদ্যোতৈৰুডুপদৰীং প্ৰকাশয়ংতঃ
প্ৰৈক্ষংত প্ৰচুৰমনোৰিলাসমেতে ॥ ১৬.৫৩ ॥

নাকীংদ্ৰাস্তমৰনিভাগমাৰসংতং
সুশ্লোকৈৰপি ভুৰনানি ভূষয়ংতম ।
নেমুঃ খাদুপনিষদং তদৈতৰেয়ীং
ৰ্যাখ্যাংতং ৰিৰিধৰিষিষ্টশিষ্যমধ্যে ॥ ১৬.৫৪ ॥

শ্ৰীমংতং শশিৰদনং কুশেশয়াক্ষং

গংভীৰস্ৱৰমতিদিৱ্যলক্ষণাঢ্যম |
পশ্যংতঃ স্ৱগুৰুমথাৰ্চিচন কৃতাৰ্থা
ৰাণ্যা তং হৰিৰতিপূৰ্ণকামমেতে || ১৬.৫৫ ||

অহৰো দুৰাগমতমঃ স্ৱগোগণৈঃ
অকৰোৰ্মুকুংদগুণৱৃংদদৰ্শনম |
অজয়শ্চতুৰ্দশ জগংতি সদ্গুণৈঃ
শৰণং গুৰো কৰুণয়াঽপি নো ভৱেঃ || ১৬.৫৬ ||

নমস্তে প্ৰাণেশ প্ৰণতৱিভৱায়াৱনিমগা
নমঃ স্ৱামিন ৰামপ্ৰিয়তম হনূমন গুৰুগুণ |
নমস্তুভ্যং ভীম প্ৰবলতম কৃষ্ণেষ্ট ভগৱন
নমঃ শ্ৰীমন মধ্ৱ প্ৰদিশ সুদৃশং নো জয় জয় || ১৬.৫৭ ||

ইতি নিগদিতৱংতস্তত্ৰ ৱৃংদাৰকেংদ্ৰা
গুৰুৱিজয়মহং তং লালয়ংতো মহাংতম |
ৱৱৃষুৰখিলদৃশ্যং পুষ্পৱাৰং সুগংধং
হৰিদয়িতৱৰিষ্ঠে শ্ৰীমদানংদতীৰ্থে || ১৬.৫৮ ||

|| ইতি শ্ৰীমৎকৱিকুলতিলক ত্ৰিৱিক্ৰমপংডিতাচাৰ্য়সুত
শ্ৰীনাৰায়ণপংডিতাচাৰ্য়ৱিৰচিতে শ্ৰীমধ্ৱৱিজয়ে
আনংদাংকিতে ষোডশঃ সৰ্গঃ ||
|| সমাপ্তোয়ং গ্ৰংথঃ ভাৰতীৰমণ মুখ্যপ্ৰাণংতৰ্গত
শ্ৰী কৃষ্ণাৰ্পণমস্তু ||